# श्रीसीताराम कल्याणम्



## सम्प्रदाय भजन मण्डलि

(वाळाडि नागराजन्, बफ़्फ़लो, न्यूयार्क्)

# ॥ ध्यान श्लोकानि ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोप शान्तये ॥

श्रीकान्तो मातुलो यस्य जननी सर्वमङ्गला ।
जनकः शङ्करो देवः तं वन्दे कुञ्जराननम् ॥

यस्य द्विरद वक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

भगवन्नाम बोधेन्द्र श्रीधरार्यात्म विग्रहम् ।
श्रीमद् वेङ्कटरामाक्य देशिकेन्द्र मुपास्महे ॥

नाम साम्राज्य रूपाणां बोधेन्द्र श्रीधरात्मनाम् ।
प्रणामं ये प्रकुर्वन्ति तेषां अपि नमो नमः ॥

प्रह्लाद नारद पराशर पुण्डरीक
व्यासाम्बरीश शुक शौनक भीष्मदाल्भ्यान् ।
रुक्माङ्गदार्जुन वसिष्ठ विभीषणादीन्
पुण्यान् इमान् परमभागवतान् स्मरामि ॥

ऐतन्निर्विद्यमानानां इच्छतां अकुतोभयम् ।
योगिनां नृप निर्णीतं हरेर्नामानु कीर्तनम् ॥

# ॥ ध्यान श्लोकानि ॥

हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिः अन्यथा ॥

विसृज्य लज्जां योऽधीते मन्नामानि निरन्तरम् ।
कुलकोटि समायुक्तः लभते मामकं पदम् ॥

विष्णोर्गानं च नृत्यं च नटनं च विशेषतः ।
ब्रह्मन् ब्राह्मणजातीनां कर्तव्यं नित्यकर्मवत् ॥

कालक्षेपो न कर्तव्यः क्षीणं आयुः क्षणे क्षणे ।
यमस्य करुणा नास्ति कर्तव्यं हरि कीर्तनम् ॥

नाहं वसामि वैकुण्ठे न योगि हृदये रवौ ।
मत्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारद ॥

आलोड्य सर्व शास्त्राणि विचार्य च पुनः पुनः ।
इदं ऐकम् सुनिष्पन्नं ध्येयो नारायणस्सदा ॥

वैदेहि सहितं सुरद्रुमतले हैमे महामण्टपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

# ॥ ध्यान श्लोकानि ॥

कस्तूरि तिलकं ललाटफलके वक्षस्थले कौस्तुभं
नासाग्रे नव मौक्तिकं करतले वेणुं करे कङ्कणम् ।
सर्वाङ्गे हरिचन्दनं च कलयन् कन्ठे च मुक्तावलिं
गोपस्त्री परिवेश्टितो विजयते गोपालचूडामणिः ॥

सम चरण सरोजं सान्द्र नीलाम्बुदाभं
जघन निहित पाणिं मण्डनं मण्डनानाम् ।
तरुण तुलसीमाला कन्धरं कञ्जनेत्रं
सदय दवळ हासं विठलं चिन्तयामि ॥

वन्दे शम्भुं उमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्य शशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

वन्दे मातरं अम्बिकां भगवतीं वाणीरमासेवितां
कल्याणीं कमनीय कल्पलतिकां कैलासनाथप्रियाम् ।
वेदान्त प्रतिपाद्यमान विभवां विद्वन्मनोरञ्जनीं
श्रीचक्राङ्कित रत्नपीठ निलयां श्रीराजराजेश्वरीम् ॥

# ॥ ध्यान श्लोकानि ॥

बुद्धिर्बलं यशो धैर्यं निर्भयत्व मरोगता ।
अजाढ्यं वाक्पटुत्वं च हनूमत् स्मरणाद्भवेत् ॥

दूरीकृत सीतार्तिः प्रकटीकृत रामवैभव स्पूर्तिः ।
दारित दशमुख कीर्तिः पुरतो मम पातु हनूमतो मूर्तिः ॥

श्री सीता लक्ष्मण भरत शत्रुघ्न हनूमत्सेवित
श्री रामचन्द्र पर ब्रह्मणे नमः ॥

श्री राधा रुक्मिणी सत्यभामा समेत
श्री गोपाल कृष्ण पर ब्रह्मणे नमः ॥

श्री सद्गुरु चरणारविन्दाभ्यां नमः ॥

*****     *****     *****

## तॊडय मङ्गळम्



नाट] [कण्टचापु

जय जानकीरमण जय विभीषणशरण
जय सरॊरुहचरण जय दीनकरुण जय जय ॥

जय लॊकशरण्य जय भक्तकारुण्य
जय दिव्यलावण्य जय जगत्पुण्य जय जय ॥

सकललॊकावास साकॆतपुरवास
अकलङ्क निजदास अब्जमुखहास जय जय ॥

शुकमुनि स्तुतिपात्र शुभद निज चारित्र
मकरकुण्डलकर्ण मॆघसमवर्ण जय जय ॥

कमनीय कॊटीर कौस्तुभालङ्कार
कमलाक्ष रघुवीर कमला विहार जय जय ॥

समररिपु जयधीर सकलगुण गंभीर
अमलहृत्सञ्चार अखिलार्तिहार जय जय ॥

रूपनिन्दितमार रुचिरसद्गुण शूर
भूप दशरथकुमार भूभार हार जय जय ॥

पापसङ्ग विदार पङ्क्तिमुख संहार
श्रीपतॆ सुकुमार सीताविहार जय जय ॥

****** ****** ******

मन्दारमूलॆ मदनाभि रामं बिंबाधरा पूरित वॆणुनादं ।
गॊगॊप गॊपीजन मद्य संस्थं गॊपं भजॆ गॊकुल पूर्ण चन्द्रं ॥

## तॊडय मङ्गळम्

आरभि] [मिश्रचापु

शरणु शरणु सुरॆन्द्र सन्नुत
शरणु श्रीसति वल्लभ
शरणु राक्षस गर्व संहार
शरणु वॆङ्कटनायक
*( स्वामि श्रीरघुनायक )* शरणु शरणु ॥

अनिमिषॆन्द्रुलु मुनुलु दिक्पतुलु
अमर किन्नर सिद्धुलु
घनततॊ रंभादि कान्तलु
गाचिनारे हॆच्चरिकया
*( मिमु गॊलिचिनारॆ हॆच्चरिकया )* शरणु शरणु ॥

कमलधरुडुनु कमलमित्रुडु
कमलशत्रुडु कमलयु
क्रममुतॊ नी कोलुवुकिप्पुडु
गाचिनारे हॆच्चरिकया
*( मिमु गॊलिचिनारॆ हॆच्चरिकया )* शरणु शरणु ॥

परमपद गॊविन्द माधव
पद्मनाभ जनार्दन
धरणिधर वर गरुडवाहन
दैत्य बलिमद भञ्जन
*( दास मानस रञ्जन )* शरणु शरणु ॥

एन्नगल प्रह्लाद भक्तुलु
येलमितॊ मिमु गोलुव वच्चिरि
विन्नपमु विनवय्य दॆवर
वॆङ्कटाचल नायक
*( विजय वॆङ्कटनायक – स्वामि श्रीरघुनायक )* शरणु शरणु ॥

****** ****** ******

## तोडय मङ्गळम्

मध्यमावति] [आदि

मुरहर नगधर मुकुन्द माधव
गरुडगमन पङ्कजनाभ
परमपुरुष भवभञ्जन केशव
नरमृगशरीर नमो नमो

नारायण ते नमो नमो – भव
नारद सन्नुत नमो नमो ॥ नारायण ॥

जलधिशयन रविचन्द्र विलोचन
जलरुह भवनुत चरणयुग
बलिबन्धन गोपीजन वल्लभ
नलिनोधर ते नमो नमो ॥ नारायण ॥

श्रीवत्सलाञ्छन पीताम्बरधर
देवकिनन्दन दयानिधे
गोवत्सपालन गोवर्धनधर
गोपप्रिय ते नमो नमो ॥ नारायण ॥

कौसल्यात्मज कामित फलद
करुणासागर कान्तिमय
दशरथ नन्दन दनुजकुलान्तक
कुशलव जनक ते नमो नमो ॥ नारायण ॥

तारापतिहर तपनकुलोत्भव
तापस मुनिगण वन्द्यपद
मारीचान्तक मारुतिसेवित
वारिधि बन्धन नमो नमो ॥ नारायण ॥

आदिदेव सकलागम पूजित
यादवकुल मोहनरूप
वेदोद्धर श्रीवेङ्कटनायक
राधाप्रिय ते नमो नमो ॥ नारायण ॥

****** ****** ******

## तॊडय मङ्गळम्

सावॆरि] [रूपक

दॆवॆश गणाराधित दिव्याम्बुज पाद ।
श्रीवॆङ्कट गिरिनायक श्रीश हॆच्चरिका ॥

*॥ वॆङ्कटॆश हॆच्चरिका ॥*

कलिमानुष कलुषापह कमनीय सुकीर्ते ।
अलमेलुमङ्गा मॊहनमूर्ते हॆच्चरिका ॥

*॥ मॊहनमूर्ते हॆच्चरिका ॥*

जलजासन परिपालन जगदॆक निदान ।
कलशाम्बुधि तट शोभित चरण हॆच्चरिका ॥

*॥ मृदु चरण हॆच्चरिका ॥*

वकुळासन हरिचन्दन वनमध्य विहार ।

*। बृन्दावनमध्य विहार ।*

सकलागम परिपालन चतुर हॆच्चरिका ॥

*॥ अति चतुर हॆच्चरिका ॥*

नारायण नरपॊषण नरकादि संहरण ।

*। घॊर नरकादि संहरण ।*

हॆ रावणमदभञ्जन धीर हॆच्चरिका ॥

*॥ रघुवीर हॆच्चरिका ॥*

श्रीकॆशव नारायण गॊविन्द मुरारॆ ।

*। गॊपाल मुरारॆ ।*

हॆ माधव मधुसूदन दामॊदर शौरॆ ॥

*॥ कृष्ण दामॊदर शौरॆ ॥*

शॆषाचलनिलय वरभूष मणिवलय ।
रॊषादि विजयि मौनि विधॆय हॆच्चरिका ॥

रजनीचर वरनायक काल वनमाल ।
व्रजपालन वर विजयगॊपाल हॆच्चरिका ॥

*॥ गॊविन्द हॆच्चरिका ॥*

****** ***** *****

## तॊडय मङ्गळम्

मङ्गळकौसिक] [आदि

माधव भवतु तॆ मङ्गळम्
मधुमुरहर तॆ मङ्गळम् ॥ ॥ माधव ॥

अरविन्दलॊचन अघबृन्दमॊचन
सुरबृन्दवन्दित मङ्गळम् ॥ ॥ माधव ॥

नरवर नन्दन नागारिकॆतन
मरकत मणिनील मङ्गळम् ॥ ॥ माधव ॥

दधि नवनीतचॊर तरुणि गॊपिकाजार
मधुकैटभ संहार मङ्गळम् ॥ ॥ माधव ॥

गजराज परिपाल घन तुळसी वनमाल
निजदास परिपाल मङ्गळम् ॥ ॥ माधव ॥

व्रजसुन्दरी विलॊल विबुधॆन्द्र परिपाल
विजयगॊपाल बाल मङ्गळम् ॥ ॥ माधव ॥

****** ****** ******

राम गॊविन्द राम राम कल्याण राम
राम पट्टाभि राम राघव ॥

गॊविन्द माधव गॊपाल कॆशव
नरसिम्ह अच्युत नारायण ॥

दशरथ नन्दन सीता मनॊहर
दानव संहार दयानिधॆ ॥

वसुदॆव नन्दन राधा मनॊहर
पूतना संहार भुवनपतॆ ॥

राम राघव राजीवलॊचन
कामितफलद करिवरद ॥

कृष्ण कॆशव अम्बुजलॊचन
वाञ्छितफलद यदुवरद ॥

॥ गॊविन्दं भजरॆ मानस गॊपालं भजरॆ ॥

****** ****** ******

# ॥ गुरुध्यान श्लोकानि ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परः ब्रह्म तस्मै श्री गुरवे नमः ॥

गुरवे सर्व लोकानां भिषजे भवरोगिणाम् ।
निधये सर्व विद्यानां श्रीदक्षिणामूर्तये नमः ॥

श्रुति स्मृति पुराणानां आलयं करुणालयम् ।
नमामि भगवद्पाद शङ्करं लोकशङ्करम् ॥

यो नित्यमच्युत पदांबुज युग्म रुक्म
व्यामोहतः तदितराणि तृणायमेने ।
अस्मत् गुरोः भगवतोस्य दयैक सिन्धो
रामानुजस्य चरणौ शरणं प्रपध्ये ॥

रामानुज दयापात्रं ज्ञानवैराग्य भूषणम् ।
श्रीमत् वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

अभ्रमं भङ्गरहितं अजडं विमलं सदा
आनन्दतीर्थ मतुलं भजे तापत्रयापहम् ॥

पूज्याय राघवेन्द्राय सत्य धर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥

मन्दस्मित मुखाम्बोजं महनीय गुणार्णवं
मधुराभाषिणं शान्तं सर्वभूत दयापरं ।
भक्त वात्सल्य जलधिं परमानन्द विग्रहम्
ज्ञानानन्दं प्रपन्नोस्मि निर्मल ज्ञानसिद्धये ॥

# ॥ गुरुध्यान श्लोकानि ॥

यस्य स्मरण मात्रेण नाम भक्तिः प्रजायते ।
तं नमामि यति श्रेष्ठं बोधेन्द्रं जगतां गुरुम् ॥

श्रीकण्ठमिव भास्वन्तं शिवनाम परायणम् ।
श्रीधरं वेङ्कटेशार्यं श्रेयसे गुरुमाश्रये ॥

यस्याङ्गं कनकाभ काम सदृशं फालं त्रिपुण्ड्राङ्कितं
वाणी श्रीरघुनाथ नामसुधयापि आर्द्रा असकृद्धारया ।
चेतसि अम्बुजलोचनो यदुपतिः खेलत्यलं राधया
तं वै वेङ्कटराम देशिकवरं सर्वात्मना अहं भजे ॥

ब्रह्मानन्दं परम सुखधं केवलं ज्ञानमूर्तिम्
द्वन्द्वातीतं गगनसदृशं तत्वमस्यादि लक्ष्यम् ।
ऐकम् नित्यं विमलमचलं सर्वधी साक्षिभूतम्
भावातीतं त्रिगुण रहितं सद्गुरुं तं नमामि ॥

॥ श्री सद्गुरु चरणारविन्दाभ्यां नमः ॥

## ॥ गुरु ध्यानम् ॥

भगवन्नाम बोधेन्द्रान् श्रीधरार्यान् गुरुंस्तथा ।
श्रीमद् वेङ्कटरामाख्यान् देशिकेन्द्रान् नमाम्यहम् ॥

बेहाग्] [आदि

गुरुमौळिमणे भजे भवन्तम्
शरणागत चिन्तामणे ॥ गुरु ॥

कल्याणं मयि कलय मुनीन्द्र
तुल्य विभव बोधेन्द्र यतीन्द्र ॥ गुरु ॥

साधुजन श्लागित सत्कीर्ते
श्रीधर वेङ्कट कुलगुरुमूर्ते ॥ गुरु ॥

अङ्कित हरिनाम वागभिराम
शशाङ्क वधन श्रीवेङ्कटराम ॥ गुरु ॥

खण्डित मानस शत्रुस्तोम
पण्डित पूजित कोदण्डराम ॥ गुरु ॥

नामब्रह्म परायणसिम्ह
पामरजन पावन नरसिम्ह ॥ गुरु ॥

***** ***** *****

गुरुमहराज् गुरु जय जय परब्रह्म सद्गुरु ।
गुरुमहराज् गुरु जय जय बोधेन्द्र सद्गुरु ।
गुरुमहराज् गुरु जय श्रीधर वेङ्कटेश सद्गुरु ।
गुरुमहराज् गुरु जय जय वेङ्कटराम सद्गुरु ।

***** ***** *****

॥ सद्गुरु बोधेन्द्र स्वामिकी – जै ॥
॥ श्रीधर वेङ्कटेश अय्यावारिकी – जै ॥
॥ मरुदानल्लूर् सद्गुरु स्वामिकी – जै ॥

***** ***** *****

॥ गुरु ध्यानम् ॥

नादब्रह्म मयीं निजाङ्ग रसिकां वीणां तुदन् मञ्जुळाम्
श्रीशावेशान् नटन चतुरो रञ्जयन् भक्ति मुग्धान् ।
आनन्दाश्रु चयैः सुपूर्ण नयनः भिन्दन् मनः कल्मषान्
वर्वर्तीह गुरुः महान् गुण निधिः गोपालकृष्णो मम ॥
वर्वर्तीह गुरुः महान् गुण निधिः सञ्जीविरायो मम ॥

साम] [आदि

कृष्ण सद्गुरु कृपावृक्ष स्वरूप गुरु
कनक कशिपु वैरि नरसिम्ह उपासित
भागवतोत्तम श्रीगोपाल ॥ कृष्ण ॥

स्वर्णारण्यमुलो सुजन्ममेत्ति पेरिगि
कर्णामृतमुग भजनलु तप्पग
गोप्पग अनुदिनमु चेशे श्रीगोपाल ॥ कृष्ण ॥

सन्ततं हरिनाम स्मरण प्रवाहम्
श्लाघ्य तुलसीहार अलङ्कृत ग्रैवेयम्
सूत्रमुतो अक्षयपात्रमु तंबुरा
सुखमुग चेकोनि स्थिरमुग
नित्योत्सवमु अनुष्ठिञ्चे पेद्दलु श्रीगोपाल ॥ कृष्ण ॥

****** ****** ******

गुरुदिव्य चरणारविन्दं भजामि
गुरुवर्य गोपालकृष्णं स्मरामि
भावान्तरङ्ग तरङ्गं भजामि
नामामृत पानलोलं स्मरामि

श्रीनारसिम्ह स्वरूपं भजामि
मीनाक्षिसुत नित्य विनुतं नमामि

****** ****** ******

॥ सद्गुरु गोपालकृष्ण स्वामिकी – जै ॥

## ॥ गीतगोविन्द ध्यानश्लोकानि ॥

यद्गोपी वदनेन्दु मण्डनमभूत् कस्तूरिका पत्रकं
यल्लक्ष्मीकुच शातकुम्भ कलशे व्याकोशमिन्दीवरम् ।
यन्निर्वाण विधान साधनविधौ सिद्धाञ्जनं योगिनां
तन्नः श्यामळमाविरस्तु हृदये कृष्णाभिधानं  महः ॥

राधामनोरम रमावर रासलीला
गानामृतैक फणितं कविराजराजम् ।
श्रीमाधवार्चन विधौ अनुराग सद्म
पद्मावती प्रियतमं प्रणतोस्मि नित्यम् ॥

श्रीगोपाल विलासिनी वलय सद्रत्नाति मुग्धाकृति
श्रीराधापति पादपद्म भजनानन्दाब्धि मग्नोऽनिशम् ।
लोके सत्कविराजराज इति यः ख्यातो दयाम्भोनिधिः
तं वन्दे जयदेव सद्गुरुवरं पद्मावतीवल्लभम् ॥

यदि हरिस्मरणे सरसं मनः
यदि विलासकलासु कुतूहलम् ।
मधुर कोमल कान्त पदावलीं
श्रुणु तदा जयदेव सरस्वतीम् ॥

*****      *****      *****

## ॥ कल्याण अष्टपदी ॥

सा ससाध्वस सानन्दं गोविन्दे लोल लोचना ।
शिञ्जान मञ्जु मञ्जीरं प्रविवेश निवेशनम् ॥

मध्यमावति]                                                  [आदि

राधा वदन विलोकन विकसित विविध विकार विभङ्गम् ।
जलनिधिमिव विदुमण्डल दर्शन तरळित तुङ्ग तरङ्गम् ॥

हरिम् ऐकरसं चिरं अभिलषित विलासम् ।

सा ददर्श गुरु हर्षवशं वद  वदनमनङ्ग विकासम् ॥                ॥ हरिम् ॥

हारममलतर तारमुरसि दधतं परिरभ्य विदूरम् ।
स्फुटतर फेन कदम्ब करम्बितं इव यमुनाजल पूरम् ॥ ॥ हरिम् ॥

श्यामळ मृदुळ कळेबर मण्डलं अधिगत गौरदुकूलम् ।
नीलनळिनमिव पीतपराग पटलभर वलयितमूलम् ॥ ॥ हरिम् ॥

तरळ दृगञ्चल चलन मनोहर वदन जनित रतिरागम् ।
स्फुट कमलोदर खेलितखञ्जन युगमिव शरदि तडागम् ॥ ॥ हरिम् ॥

वदन कमल परिशीलन मिळित मिहिरसम कुण्डल शोभम् ।
स्मितरुचि रुचिर समुल्ल सिताधर पल्लव कृतरतिलोभम् ॥ ॥ हरिम् ॥

शशिकिरणच् चुरितोदर जलधर सुन्दर कुसुम सुकेशम् ।
तिमिरोदित विदुमण्डल निर्मल मलयज तिलक निवेशम् ॥ ॥ हरिम् ॥

विपुल पुळकभर दन्तुरितं रतिकेळि कलाभिरधीरम् ।
मणिगण किरण समूह समुज्वल भूषण सुभग शरीरम् ॥ ॥ हरिम् ॥

श्रीजयदेव भणित विभव द्विगुणीकृत भूषणभारम् ।
प्रणमत हृदि विनिधाय हरिं रुचिरं सुकृतोदयसारम् ॥ ॥ हरिम् ॥

***** ***** *****

अतिक्रम्यापाङ्गं श्रवणपथ पर्यन्तगमन– प्रयासेनेव अक्ष्णोः तरलतरभावं गमितयोः ।
इदानीं राधायाः प्रियतम समालोकसमये पपात स्वेताम्बुप्रसर इव हर्षाश्रुनिकरः ॥

भजन्त्या तल्पान्तं कृतकपट कण्डूति विहित–
स्मिते याते गेहात् बहिरपि हितालीपरिजने ।
प्रियास्यं पश्यन्त्याः स्मरशर समाकूतसुभगं
सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः ॥

जयश्री विन्यस्तैः महित इव मन्दार कुसुमैः स्वयं सिन्दूरेण द्विपरण मुदा मुद्रित इव ।
भुजापीड क्रीडाहत कुवलयापीड करिणः प्रकीर्णाऽसृग्बिन्दुः जयति भुजदण्डो मुरजितः ॥

॥ इति श्रीगीतगोविन्दे श्रीकृष्णदास जयदेवकृतौ सानन्द गोविन्दो नाम ऐकादशः सर्गः ॥

# ॥ गौरी कल्याणम् ॥

कुरञ्चि]                                [रूपक/ चापु

गौरी कल्याण वैभोगमे
सीता कल्याण वैभोगमे
राम कल्याण वैभोगमे

पवनज स्तुतिपात्र पावन चरित्र
रविसोम वरनेत्र रमणीय गात्र        ॥ सीता ॥

भक्तजन परिपाल भरित शरजाल
भुक्ति मुक्तिदलील भूदेवपाल        ॥ राम ॥

पामरासुर भीम परिपूर्ण काम
श्याम जगदभिराम साकेत राम      ॥ सीता ॥

सर्वलोकाधार समरैक वीर
गर्वमानसदूर कनकाग धीर        ॥ राम ॥

निगमागम विहार निरुपम शरीर
नगधराघ विदार नतलोकाधार       ॥ सीता ॥

परमेशनुत गीत भवजलधिपोत
धरणिकुल सञ्जात त्यागराजनुत     ॥ राम ॥

*****      *****      *****

॥ सीताकान्त स्मरणं – जय जय राम राम ॥

॥ कोट्टनोत्सवः ॥

सौराष्ट्रं] [चापु

अल्लों नेंरे डल्लों
सीता कल्याणम्बु चेलुवन्दमायें ॥ अल्लों ॥

दाशरथिगा बुट्टि ताटकनु गोट्टि
कौशिकुनि यागम्बु गाचें रघुवरुडु ॥ अल्लों ॥

भूतलम्बुलनेल्ल गौतमुनि सतिकि
राति जन्ममु बापे प्रीतितों नतडु ॥ अल्लों ॥

जनक यज्ञम्बुनकु चनुदेञ्चि वेंग
घनत राजुलु जूड गौरवम्बुननु ॥ अल्लों ॥

हरुनि कोंदण्डम्बुनपुडु चेंबूनि
परगबट्टि धनुर्भङ्गम्बु जेंसें ॥ अल्लों ॥

आक्षणमें जनकुण्डु अतिमोद मोन्दि
इक्ष्वाकु तिलकुनिकि इच्चें भूमिजनु ॥ अल्लों ॥

आनन्दमुनु पोन्दि अखिल देंवतुलु
पूनि वर्षिञ्चिरि पुष्पवर्षम्बु ॥ अल्लों ॥

ख्यातिगा नच्युतुडु करिवरदुडपुडु
सीता समेंतुडै चेंलगें रघुवरुडु ॥ अल्लों ॥

***** ***** *****

सावेंरि] [रूपक

सुव्वि रामचन्द्र सुव्वि सुव्वि रामभद्र सुव्वि
सुव्वि रामाभिराम सुव्वलालें

विमल भोंगिशयन रङ्ग वेंद वेंदान्त रङ्ग
अमित भावनान्त रङ्ग अखिल रङ्ग ॥ सुव्वि ॥

वस्तुवैन माणिक्य वैडूर्य मॆडलॊन
सुस्तिरमुगनुन्न कस्तूरि रङ्ग ॥ सुव्वि ॥

भागवतुल पादजलमु पैनि चल्लुकोण्टे चालु
भागीरतिकि पॊदामनुचु पयणमॆटिकॆ ॥ सुव्वि ॥

भागवतमु जिह्वनुञ्चि पठन सॆयुचुन्टॆ चालु
बागुमीरिनट्टि अमृत पानमॆटिकॆ ॥ सुव्वि ॥

***** ***** *****

सौराष्ट्रं] [चापु

पाहिमां श्रीराम पट्टाभिराम

सकल जगदाधार सन्मुख धीर ॥ पाहिमां ॥

जानकी प्रियबन्धॊ जय दयासिन्धॊ ॥ पाहिमां ॥

कारुण्य गुणधाम कल्याणराम ॥ पाहिमां ॥

मदन मॊहनगात्र मङ्गळचरित्र ॥ पाहिमां ॥

भक्त हृदय निवास भद्रगिरिवास ॥ पाहिमां ॥

***** ***** *****

मद्यमावति] [चापु

सुव्वि चन्द्रसॆकरुलकु
सुव्वि नन्दि वाहनुलकु
गङ्गादरुलकु गौरीसमॆतुलकु
गरकण्ठ कैलास वासुलकु सुव्वि... सुव्वालॆ

सुव्वि लक्ष्मी नरसिम्हुनिकि
सुव्वि गरुड वाहनुनिकि
सर्वाधारुनिकि सौभाग्य धीरुनिकि
वरदुनिकि वैकुन्ठ वासुनिकि सुव्वि... सुव्वालॆ

मेलैन मुथ्याल हारालु – सीता
मेनिकि तगिनट्टि हीरालु
वेलुङ्ग रालम्बरालु सरालचे
जालपुरालीलु विन्चामरालु... सुव्वाले

पट्टाभि राम स्वरूपुलु पर–
मात्मुलु सुप्रदीपुलु
मट्टु मीरिनयट्टि मङ्गळ गिरि पूनि
अट्टे मम्मेलिन आदिमूर्तुलु मीरु... सुव्वाले

अक्षतल गोपाल कृतियैन सुव्वि
अमरङ्ग एव्वरैन पाडिन
आक्षणमे वीक्षिञ्चि रक्षिञ्चु नेव्वरि
लक्ष्मी कटाक्षमुनकु कञ्जाक्षुलैय्येरु... सुव्वाले

***** ***** *****

सावेरि] [रूपक

राम राम राम राम राम राम राम राम
राम राम रामचन्द्राय मङ्गळं ॥

रामचन्द्राय जनक राजजा मनोहराय
मामकाभीष्टदाय महित मङ्गळं ॥ राम ॥

सार कुङ्कमोपेत चन्दनानु चर्चिताय
हार कटक शोभिताय भूरि मङ्गळं ॥ राम ॥

नवसरोज लोचनाय नतजनानुग्राहकाय
पवनतनय सन्नुताय परम मङ्गळं ॥ राम ॥

ललितरत्न कुण्डलाय तुलसीधाम मालिकाय
जलध शदृश देहाय चारु मङ्गळं ॥ राम ॥

रामदास मृदुळ हृदय तामरस निवासाय
स्वामि भद्रगिरि वराय साधु मङ्गळं ॥ राम ॥

***** ***** *****

यदुकुल काम्भोजि] [आदि

चित्तजुनि कन्नैयकु जयमङ्गळं – मद
हर्ति भक्तिकैन चित्त वृत्तुडुत्त मोत्तमुनकु ॥ चित्त ॥

अन्दमैन चन्द्रुनि निन्दिञ्चु मुखारविन्द
मिन्दिरानन्द गोविन्द नन्द नन्दुनिकि ॥ चित्त ॥

बालरामु रामुडैन क्षेममोसगु सकलगुण
दामुडैन मा पट्टाभि रामस्वामि रूपुनकुन् ॥ चित्त ॥

कोरि भक्तिमीरि चोरि दारि कन्नवारि कलु–
षारि भूरि वैभव कस्तूरि रङ्ग शौरिकिनि ॥ चित्त ॥

***** ***** *****

वसन्ते वासन्ती कुसुम सुकुमारैः अवयवैः
भ्रमन्तीं कान्तारे बहुविहित कृष्णानुसरणाम् ।
अमन्दं कन्दर्पज्वर जनित चिन्ताकुलतया
वलद्बाधां राधां सरसमिदम् ऊचे सहचरी ॥

वसन्ता / हुसेनि ] [आदि

ललित लवङ्ग लता परिशीलन कोमल मलय समीरे ।
मधुकर निकर करम्बित कोकिल कूजित कुञ्ज कुटीरे ॥

विहरति हरिरिह सरस वसन्ते ।
नृत्यति युवति जनेन समं सखि विरहि जनस्य दुरन्ते ॥ ॥ विहरति ॥

श्रीजयदेव भणितमिद मुदयति हरिचरण स्मृति सारम् ।
सरस वसन्त समय वनवर्णनम् अनुगत मदन विकारम् ॥ ॥ विहरति ॥

***** ***** *****

कुरञ्चि]　　　　　　　　　　　　[रूपक

गौरी कल्याण वैभवमॆ
सीता कल्याण वैभवमॆ
राम कल्याण वैभवमॆ

श्रीरामचन्द्रुलकु शॊभनमु नॆड्डु
प्रॆमतॊ बन्धुवुलन् पिलुवनम्पुदुरु ॥ सीता ॥

इक्ष्वाकु वम्शान बुट्टिन हरिनि
रक्षिम्चमनि म्रॊक्कॆद अनुरागमुन ॥ सीता ॥

श्रीराम जय जय , सीता मनॊहर
कारुण्य सागर , करुणानिधॆ जय

श्रीरामुनि पॆण्ड्लिकिनि शृङ्गार वधुलॆल्ल
बङ्गारु तट्टलॊ पसुपुलन् तॆच्चॆरु

*****　　*****　　*****

## ॥ चूर्णिका ॥

( कल्याण वैभव वर्णन )

अथ जनक नृपतिः मनॊरथ महार्णव पारङ्गत्वा परमानन्दजलधौ मग्नः जगच्चक्षुः कुलभूषणस्य जगत्त्रय संरक्षण दीक्षितस्य नतजनकल्पतरॊः , श्रीकॊदण्डदीक्षागुरॊः , विवाह महॊत्सवाय ।

क्षितिरथवर पूरितमनॊरथ भगीरथ वंशजातं , अतिरथमहारथ पृथिवीपति वन्दितं दशरथमहाराजं , रथगज तुरगपदातिसहितं समन्त्रिपुरॊहितं सुपुत्रकळत्रं सपरिवारमानाय्य सत्कृत्य ।

नानाविधक्रमुक नाळिकॆर रम्भाधिफलयुक्त सहस्र शातकुम्भ स्तम्ब भूषितॆ , जम्भारि चिरकाङ्क्षितॆ ,

परिपूर्ण मनॊरथ परमामॊद पौरभक्तजन परस्परकृत सल्लापॆ , सकलजन मनॊहरालापॆ ,

किरीटकवच कुण्डल केयूर नूपुर मुक्ताहार विभूषित नानाविध मृदुल चित्रासनस्त नानादेशागत राजवर्यबृन्दे , लोचनानन्दे ,

नानाविद स्वर्णपुष्प स्तबककोटि देदीप्यमान मलय चन्दनागरु गुग्गुलु गोघृतादि परिमळवस्तु घुमघुमायमान सभान्तरे, निरन्तर मणिखचित मुकुर परम्परे ।

भेरी मृदङ्ग मद्धळ काहळ दुद्दुभि तुर्य तुम्बुरु वीणा वेणु मुरज मड्डुग डिण्डिम डमरुक झर्झरि झल्लरि धवळशङ्क पणव पटहाद्यष्टादश वाद्यघोष सन्तत शब्दायमान सकलदिगन्तरे, नारद तुम्बुरु वीणागान मनोहरे ,

सवत्स गोसहस्रानेक कोटि हिरण्य वस्त्राभरण भूदान बहुमान सन्तोषित पात्रभूत उभयसम्बन्धी राजश्रेष्ठ वंशावळि नाम गोत्र प्रवरोच्चारण निपुण वसिष्ठ वामदेव विश्वामित्र शतानन्दादि सकल मुनिगण सङ्कीर्ण विवाह वेदिकामध्ये ।

कृत विविधस्तव सिद्धमहर्षि सङ्गे , अब्जभव विष्णुभव आदित्यगण सप्तमरुदष्टवसु यक्षजन सिद्धगण रुद्रगण दिक्पतिकुल प्रमदविहित मित्रकुलरत्न सुगुण स्तव समस्त प्रशस्त बिरुदस्तोम निनदे , निरस्त धनदेन्द्र बिरुदे ,

सङ्क्रन्दनाद्यमर बृन्दावकीर्यमान मन्दारप्रमुख नन्दनवन कुसुमनिवहवर्षे नवरत्नखचित कनकमयमण्डपे ।

किञ्चितारब्ध तारुण्यं नतजनैक कारुण्यं , विदलित महेश चापं , परिहृत मुनिजनतापं भानुकुलरत्न प्रदीपं सम्पूरित भक्तजनकामं सजल जलधर श्यामं सकल लोकाभिरामं **श्रीरामं** सन्निवेश्य ॥

केतकी चम्पक मल्लिका कुसुमाद्यलङ्कृत नीलालकवेणीं कलहम्सगामिनीं करुणावलोकिनीं अनर्घमणिखचित हेमनिष्क कण्ठीं , स्वरजित कळकण्ठीं , हाटकमणिमय ताटङ्कालङ्कृत कपोलां , अगणित कल्याणगुण शीलां , अरविन्दसुन्दर मन्दहासमुखीं , श्रीरघुनन्दनाभिमुखीं **सीतां** च सन्निवेश्य ॥

*****  *****  *****

## ॥ तैल नलुगु ॥

पन्तुवराळि / पूर्विकल्याणि] [रूपक

१) दशरथ तनयुडु रामा

पशि पशि तनमुन मुशि मुशि नगुवुल
दश दिशलनु तन वशमुन कोशगिन
शशिमुकुडनि शं वसन सुमुखुडै

दशरथ तनयुडु रामा
ताटकि नॆशनु विनुमा
कलि तीर्चॆनु श्रीरामा
घनुडॆ ओ भामा ॥ शोभानॆ ॥

२) जनकुनि तनयनु कॊर्या

वनजनयन निनु दिनमुन विनिविनि
तनयुनि नेनरुन मनसुन कनुकोनि
तनपनि धनमनि तनविनि तनशिन

जनकुनि तनयनु कॊर्या
जानकि चिन्तनु जॆर्या
अनुभवमुन घटि तॆर्या
आनन्द मीर ॥ शोभानॆ ॥

३) अतिवितरण गलवाडॆ

अतुलित मतिमति शतकृति कृपकृति
रतिपति कदिपति इनकुल महिमति
सततमु श्रितजन तनुलकु गतिवै

अतिवितरण गलवाडॆ
असुरल नणचिन इतडॆ
पतितुल कुल पावनुडॆ
भरदारा सहॊदरुडॆ ॥ शोभानॆ ॥

***** ***** *****

॥ नूतन वस्त्र समर्पणम् ॥

शताय स्वाहेत्याह । शतायुर्वै पुरुषश् शतवीर्यः । आयुरेव वीर्यमवरुन्दे ।
सहस्राय स्वाहेत्याह । आयुर्वै सहस्रम् । आयुरेवा वरुन्दे ।
सर्वस्मै स्वाहेत्याह । अपरिमितमेवा वरुन्दे ॥

श्रेयोवसीय आयत्संभूतं भूतम् । चित्रः केतुः प्रभा नाभान्त्संभान् ।
ज्योतिष्मा॑ँस्तेजस्वा नातप॑ँस्त पन्नभितपन्न् ।
रोचनो रोचमानश् शोभनश् शोभमानः कल्याणः ॥

******************************************

नवो नवो भवति जायमानोहनाम् केतुरुषसामेत्यग्रे ।
भागन्देवेभ्यो विदधात्यायन्प्र चन्द्रमास्तिरति दीर्घमायुः ॥

सुमङ्गलीरियव्वधूरिमा॑ँ समेत पश्यत ।
सौभाग्यमस्यै दत्वा यादास्तव्विपरेतन ।
इमां त्वं इन्द्रमीड्वस् सुपुत्रा॑ँ सुभगां कुरु ।
धशास्यां पुत्रानाधेहि पतिमेकाधशं कृधि ॥

## ॥ मङ्गलाष्टकम् ॥

लक्ष्मीः यस्य परिग्रहः कमलभूः सूनुर् गरुत्मान् रतः
पौत्रः चन्द्र विभूषणः सुरगुरुः शेषश्च सय्यासनम् ।
ब्रह्माण्डं वरमन्दिरं सुरगणाः यस्य प्रभोः सेवकाः
स त्रैलोक्य कुटुंब पालनपरः कुर्यात् सदा मङ्गळम् ॥ १ ॥

*सुलग्ने सावदानः । सुमुहूर्ते सावदानः ॥*

ब्रह्मा वायु गिरीश शेष गरुडा देवेन्द्र कामौ गुरुः
चन्द्रार्कौ वरुणानलौ मनु यमौ वित्तेस विघ्नेश्वरौ ।
नासत्यौ निरुरुतिः मरुद्गणयुताः पर्जन्य मित्रादयः
सस्त्रीकाः सुरपुङ्गवाः प्रतिदिनं कुर्वन्तु वो मङ्गळम् ॥ २ ॥

*सुलग्ने सावदानः । सुमुहूर्ते सावदानः ॥*

विश्वामित्र पराशरौर्व भृगवाऽगस्त्यः पुलस्त्यः ऋतुः
श्रीमान् अत्रि मरीचि कौत्स पुलहाः शक्तिर् वसिष्ठोङ्गिराः ।
माण्डव्यो जमदग्नि गौतम भरद्वाजादयस् तापसाः
श्रीमद् विष्णु पदाब्ज भक्तिनिरताः कुर्वन्तु वो मङ्गळम् ॥ ३ ॥

*सुलग्ने सावदानः । सुमुहूर्ते सावदानः ॥*

मान्धाता नहुषोऽम्बरीष सगरौ राजा पृथुर्हैहयः
श्रीमान् धर्मसुतो नलो दशरथः रामो ययातिर् यदुः ।
इक्ष्वागुश्च विभीषणश्च भरतश्च उत्तानपाद धृवौ
इत्याद्याः भुवि भूभुजाः प्रतिदिनं कुर्वन्तु वो मङ्गळम् ॥ ४ ॥

*सुलग्ने सावदानः । सुमुहूर्ते सावदानः ॥*

श्रीमेरुः हिमवाम्श्च मन्दरगिरिः कैलास शैलस्तथा
माहेन्द्रो मलयश्च विन्ध्य निषधौ सिम्हस् तथा रैवतः ।
सह्याद्रिः वरगन्धमादनगिरिः मैनाक गोमन्तकौ
इत्याद्याः भुवि भूभृतः प्रतिदिनं कुर्वन्तु वो मङ्गळम् ॥ ५ ॥

*सुलग्ने सावदानः । सुमुहूर्ते सावदानः ॥*

गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा
कृष्णा भीमरथी च फल्गु सरयू श्रीगण्डकी गोमती ।
कावेरी कपिला प्रयाग विनता वेत्रावतीत्यादयः
नद्यः श्रीहरिपाद पङ्कजभवः कुर्वन्तु वो मङ्गळम् ॥ ६ ॥

*सुलग्ने सावदानः । सुमुहूर्ते सावदानः ॥*

वेदाश् चोपनिषद्गणाश्च विविधाः साङ्गाः पुराणान्विताः
वेदान्ता अपि मन्त्र तन्त्र सहिताः तर्कास् स्मृतीणां गणाः ।
काव्यालङ्कृति नीति नाटकगणाः शब्दाश्च नानाविदाः
श्रीविष्णोः गुणराशि कीर्तनपराः कुर्वन्तु वो मङ्गळम् ॥ ७ ॥

*सुलग्ने सावदानः । सुमुहूर्ते सावदानः ॥*

आदित्यादि नवग्रहाश् शुभकराः मेषादयो राशयः
नक्षत्राणि सयोगकाश्च तिथयः तद्देवतास् तद्गणाः ।
मासाब्दा रुतवस् तथैव दिवसाः सन्ध्यास् तथा रात्रयः
सर्वे स्थावर जङ्गमाः प्रतिदिनं कुर्वन्तु वो मङ्गळम् ॥ ८ ॥

*सुलग्ने सावदानः । सुमुहूर्ते सावदानः ॥*
*सीता राघवयोः विवाहसमये कुर्वन्तु वो मङ्गळम् ॥*

इत्येतत् वरमङ्गलाष्टकमिदं श्री वादिराजेश्वरैः
व्याख्यातं जगतां अभीष्टफलदं सर्वाऽशुभ ध्वंसनम् ।
माङ्गल्यादि शुभक्रियासु सततं सन्ध्यासुवा यः पठेत्
धर्मार्थादि समस्त वाञ्चित फलं प्राप्नात्यसौ मानवः ॥

*****　*****　*****

## श्री सीता प्रवरं

आङ्गीरस, आयास्य, गौतम, त्रयार्षेय प्रवरान्वित, गौतम गोत्रोद्भवां, निमि वंसोद्भवस्य स्वर्णरोम महाराज वर्मणो नप्त्रीं, ह्रस्वरोम महाराजवर्मणः पौत्रीं, जनक महाराजवर्मणः पुत्रीं, सीता नाम्नीं, महालक्ष्मी स्वरूपिणीं इमां कन्याम् –

## श्री राम प्रवरं

वासिष्ठ, मैत्रावरुण, कौन्डिन्य, त्र्यार्षेय प्रवरान्वित, वासिष्ठ गोत्रोद्भवाय, श्रीमदिक्ष्वाकु वंशोद्भवस्य नाभाग महाराजवर्मणो नप्त्रे, अज महाराजवर्मणः पौत्राय, दशरथ महाराजवर्मणः पुत्राय, श्रीरामचन्द्रवर्मणे महाविष्णु स्वरूपाय वराय –

**वृणीमहे**

## ॥ कन्यादानम् – पाणिग्रहणम् ॥

१. कन्यां कनक सम्पन्नाम् सर्वाभरण भूषिताम्
दास्यामि विष्णवे तुभ्यम् ब्रह्मलोक जिगीषया ॥

२. विश्वं भराः सर्वभूताः साक्षिण्यः सर्वदेवताः
इमां कन्यां प्रदास्यामि पित्रूणां तारणायच ॥

३. इयं सीता मम सुता सहधर्मचरी तव
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥

*इति मन्त्रेण जनकः मन्दस्मितां **सीतां** शोभन मन्त्राक्षत हिरण्योदक धारा सहितं **श्रीरामचन्द्र** करारविन्दे समर्पयामास ॥*

॥ मेळ ताळ नाम गोषम् – कर्पूर आरति ॥

नामावळि : जय जय सीताराम् – जय जय रघुराम् ॥

॥ सीता कान्त स्मरणं – जय जय राम राम ॥

****** ****** ******

## ॥ माङ्गल्य धारणम् ॥

माङ्गल्यं तन्तुनानेन मम ( जगत् ) जीवन हेतुना
कण्ठे बद्नामि शुभगे जीवेव शरदः शतम् ॥

*इति मन्त्रेण **श्रीरामः** माङ्गल्य सूत्रं **सीताया** कण्ठे बद्धवान् ॥*

॥ मेळ ताळ नाम गोषम् – नैवेद्यम् , कर्पूर आरति ॥

नामावळि : सीताराम् सीताराम् श्रीरघुनन्दन सीताराम् ॥

॥ जानकी कान्त स्मरणं – जय जय राम राम ॥

****** ****** ******

मद्यमावति]                                        [आदि

आनन्द मानन्द मायॆनॆ – मन
रामुडु पॆण्ड्लि कॊडुकायॆनॆ – मन
जानकि पॆण्ड्लि कूतुरायॆनॆ

ना नॊमु फलमॆल्ल नेडु सफलमायॆ          ( आनन्द )

वीयालवारॆल्ल वच्चिरि – वारु
विडिदिण्ड्लकु नॆतॆञ्चिरि
एदुरुसॆसलु चल्लि
यॆनुगु लेक्कि वच्चिनदि               ( आनन्द )

वसिष्ठादुलन्दरु वच्चिरि – वारु
मङ्गळ स्नानम्बु जॆयिञ्चिरि
वेल्लम्पु दॊवतुलु
वॆडुकतॊ गट्टिनदि                    ( आनन्द )

जनकुडु राम पूज जॆसॆनु
सीतनु प्रॆमतॊ दारबॊशॆनु
रत्नाल तालि ( बोट्टु ) रामुडु
रमणि कण्ठमुन गट्टिनदि

****** ****** ******

## अक्षतारॊपणम्

जानक्याः पाणि सरॊरुहाञ्जलिगता रक्तास्तु मुक्तास्थिता
या मुक्ता गळितानुराग विमला रामॊत्तमाङ्ग श्रिताः ।

या तास्तस्य रघूद्वहस्य परमं साम्यं विशुद्धात्मनः
ताः कुर्वन्तु अभितश्शुभानि सततं श्रीराम वैवाहिकाः ॥

***** ***** *****

# कल्याण तरङ्गम्

काम्भोदि] [आदि

आलोकये रुक्मिणि कल्याण गोपालम्
सीता कल्याण राघवम्

नीलमेघ निभाकरं बालार्क समानचेलम्
नीलाम्बरानुजं गोपालकं नीलाळकान्तम् ( आलोकये )

द्वारकापुर मण्डपे द्वादशादित्य सन्निभे
भूरिरत्न सिंहासने भूसुरघने
वीरासने समासीनं विश्वमङ्गळ दायिनम्
धीरयोगि संसेवनं देवकी वसुदेवसूनुम् ( आलोकये )

शङ्खदुन्दुभि नादिते शतशो गन्धर्वादि गीते
पुङ्खानु पुङ्खनिगम बुधजनावृते
पङ्कजेक्षण रंभादि पटुनटन विनोदिते
कुङ्कुम केसरवर्षिते कोमळाकर चरिते ( आलोकये )

दिव्यकिरीट कुण्डल दीप्तपीताम्बरधरम्
नव्यमुक्तामणिहारं नानाविहारम्
अव्ययभूति विस्तारं अमरनारी सुराधारम्
भव्यकौस्तुभ कन्धरं भक्तमानस सञ्चारम् ( आलोकये )

अष्टमहिषी समेतं अमरनारी सुसेवितम्
तुष्टपुष्ट जनावृतं तुम्बुरु गीतम्
इष्टजन समाश्रितं ईश्वरं अपराजितम्
दृष्ट सर्वलोकजातं देवराजादि विनुतम् ( आलोकये )

हेममुक्तामणि छत्रं हीररत्न कटिसूत्रम्
चामर व्यजनावृतं शरदिन्दु वक्त्रम्
कामकोटि समगात्रं कनकाङ्गदादि विचित्रम्
श्यामसुन्दरं पवित्रं शरणागतोद्धार गोत्रम् ( आलोकये )

चन्द्रानना भैष्मी भामा जाम्बवती सत्या मित्र –
विन्दा भद्रा लक्ष्मणा काळिन्दी नायकम्
नन्दनन्दनमाश्रित बृन्दबृन्दारक वन्द्यम्
नन्दित नारायणतीर्थं आनन्दद मानन्दकन्दम् ( आलोकये )

***** ***** *****

१. रारा राजकुमार रारा ना सामि
रारा नलुगिड – चिन्नि पादमुलीरा ।

२. बङ्गारु पलकलु – वॆसियुन्नदिरा
शङ्खचक्र शार्ङ्गधर नीवु दयसायरा ।

३. तॊलिजन्म पूजलचॆ निन्नॆ जॆरितिनि
पदमुल पट्टिनानु – नादु प्राणकान्ता ।

४. नलुगिड रावय्य ना मनॊहर
वॆगमॆ रावय्य नादु प्राणकान्ता ।

५. पसुपु कुङ्कुम सुन्नं कलिपि नॆनिउडु
नलुगु पॆट्टेदनय्य पदमु लीयवय्य ।

६. परिमळ गन्धम्बु पन्नीरु जॆर्चि
बागुग पूसॆनु नादु प्राणकान्ता ।

७. तिलकमु दिद्दॆनु पूर्णचन्द्र मीकु
पुनुगु जव्वादि जॆर्चिन परिमळ तिलकम् ।

८. मल्लेलु मॊल्ललु मरुवम्पु रॊजा
पूलचॆ तोडिगिन हारमु वॆसेदनु ।

९. उप्पुनु ओकचॊत पप्पुनोकचॊत
श्री रामचन्द्र मीकु दृष्टि तीसेदनु ।

१०. मुत्यालु ओकचॊत रत्नालु ओकचॊत
श्री राघवॆन्द्र मीकु दृष्टि तीसेदनु ।

११. अप्पडालु ओकचॊत पप्पडालु ओकचॊत
श्री वेङ्कटॆश मीकु दृष्टि तीसेदनु ।

१२. हारतु लॆत्तॆनु वारिधिशायिकिनि
हारतु लॆत्तॆनु वार्धि जातकुनु ।

१३. वन्दनमु वन्दनमु वारिजनाभ
वसुदॆव पुत्र मीकु कॊटि वन्दनमु ॥

॥ नमस्कारं करॊतु ॥

शरणम्बु करिराज परिरक्षणोद्धार
शरणम्बु नक्रहृत् चक्रधर
शरणम्बु प्रह्लाद वरभक्त परिपाल
शरणम्बु पुरुष केसरि सुखेल ।

शरणम्बु घन विभीषण राज्यवितरण
शरणम्बु खर दशास्य प्रहरण
शरणम्बु अक्रूर सङ्कल्प कृतदक्ष
शरणम्बु बक मुखासुर विपक्ष ।

शरणममनुपम योगि हृज्जलजधाम
शरणमतिवेथ दुर्जनासन्नभीम
शरण मूर्जित वाञ्छा प्रचार निपुण
शरणु अम्भोजदळ नेत्र सच्चरित्र ॥

****** ****** ******

शामा] **पूलचेण्डु** [आदि

पूल चेण्ड्लाडने श्रीरामुडु – पुष्प चेण्ड्लाडने

बालरो विनरे सद्भक्त सामान्युडे
कोलाहलमुतो जानकितोनु कूडि ( पूल )

सकल जनलु पोगड रामुनि कीर्ति
सभलोनु कोनियाड
गगन चारुलु जाजी रेकुल वर्षमु
अखिल भूमिपैनि अद्भुतमुग कुरिय ( पूल )

मङ्गळ मूर्ति वीडे श्रीरघुपति
महिम गल्गिन वाडे
पङ्कज नयनरो भद्रादि्र वासुडे
श्रुङ्गारमैनट्टि सीतासमेतुडै ( पूल )

****** ****** ******

भैरवि] **दोला**

वेदमिरण्डु इरण्डु नार्काल्गळाग
ओदुमुपनिषत्तुम् नार्कयिरुगळाग
नादम् निरै ओङ्कार मञ्चमीदिल्
राघवन् तन् नायकियुडन् आडुमूञ्जल् ॥

एण्णडङ्गा देवर्गळ् मलर् मारि पोज़िय
अन्ननडै मादर्गळ् (वेण्) चामरम् पोड
मण्णिलुळ्ळ तोन्डर्गळ् मनक्कवलै ओड
कण्णनोडु रुक्मिणियाळ् आडुमूञ्जल् ।
राघवन् तन् नायकियुडन् आडुमूञ्जल् ॥

*****     *****     *****

हरिकाम्भोजि] **लालि** [आदि

लालि लालियनि ऊचेदरा – वन
मालि मालिमितो जूचेरा ॥ लालि ॥

देव देवयनि पिलिचेरा – महानु
भाव भावमुन दलचेरा ॥ लालि ॥

राम रामयनि बल्केरा – निष्
काम कामरिपुनुत रारा ॥ लालि ॥

कोरि कोरि निनु गोलिचेरा – माय
दारि दारि सद्भजनेरा ॥ लालि ॥

राज राज यनि पोगडेरा – त्याग
राज राजनुत म्रोक्केरा ॥ लालि ॥

*****     *****     *****

## ॥ प्रार्थना अभङ्ग ॥

हे दयाळुवा हे कृपाळुवा हे दयाळुवा स्वामि राघवा ॥
प्रथम का मला लावली सवी मग उपेक्षिता योग्यता नही ॥
सकळ जाणसी अन्तरस्थिति मग तुजा प्रति काय विनन्ति ॥
दास तुमचा वाट पाहतो बोलता नये कण्ठ दाटतो ॥
राम राघवा सीताराम राघवा राम राघवा राजाराम राघव ॥

*** ***** ***

सुरुटि] **मङ्गळं** [आदि

श्रीराम चन्द्रनुक्कु जय मङ्गळं नल्ल
दिव्यमुख चन्द्रनुक्कु शुभ मङ्गळं ।

माराभि रामनुक्कु मन्नु परन्दामनुक्कु
ईरारु नामनुक्कु रविकुल सोमनुक्कु ( श्रीराम )

कोन्डल् मणिवण्णनुक्कु कण्णनुक्कु मङ्गळं
कोसलै कुमारनुक्कु वीरनुक्कु मङ्गळं
पुण्डरीकत् ताळनुक्कु भूचक्र आळनुक्कु
तण्डुळवत् तोळनुक्कु जानकि मणाळनुक्कु ( श्रीराम )

कोवै मणिवायनुक्कु मायनुक्कु मङ्गळं
कोदण्डक् कैयनुक्कु मेय्यनुक्कु मङ्गळं
तावु गुणशीलनुक्कु सत्तिय विलासनुक्कु
देवर् अनुकूलनुक्कु दशरथन् बालनुक्कु ( श्रीराम )

बगिरण्ड नाथनुक्कु वेदनुक्कु मङ्गळं
भरतनां अन्बनुक्कु मुन्बनुक्कु मङ्गळं
सकल उल्लासनुक्कु तरुमन्दहासनुक्कु
अखिल विलासनुक्कु अयोद्या वासनुक्कु ( श्रीराम )

***** ***** *****